UNIVERSITY OF CAMBRIDGE

ORIENTAL STUDIES TRIPOS Part II

South Asian Studies

---

Monday 1 June 2008 13.30 – 16.30

---

**SA.13 SANSKRIT SPECIFIED TEXTS, 3**

*Candidates should answer **all** questions.*

*Write your number **not** your name on the cover sheet of **each** Answer Book.*

**STATIONERY REQUIREMENTS**
*20 Page Answer Book x 1*
*Rough Work Pad*

**You may not start to read the questions printed on the subsequent pages of this question paper until instructed that you may do so by the Invigilator.**

1 (*a*) Translate into ENGLISH: (20 marks)

परैरभिगतान् पूर्वमात्महेतून्निरस्यति ।
नेत्येतावदवच्छेद्यं विधर्माण इमे यतः ॥ ९२ ॥
अयावद्देहभावित्वं कार्श्यादेरपि दृश्यते ।
अथावस्थान्तरं तत्र तथा मृत्युरपीष्यताम् ॥ ९३ ॥
एतावानिह भेदः स्याच्छरीरे दृढ एव या ।
प्राणाद्यपगतिस्तत्र निमित्तं न प्रतीयते ॥ ९४ ॥
गुणो द्रव्यविनाशाद्वा विनाशमुपगच्छति ।
गुणान्तरोपपाताद्वा तस्मादुत्कृत्य नाश्यते ॥ ९५ ॥
न तावत्तद्द्वयं मृत्यौ सर्वस्यैवोपलभ्यते ।
अविनष्टशरीरस्य प्राणादिश्चापगच्छति ॥ ९६ ॥
तस्मान्न देहधर्मत्वं प्राणादेरिति गम्यते ।
तस्मिन् दृष्टे ऽप्यसद्भावात् स्रग्विलेपनगन्धवत् ॥ ९७ ॥
बहिर्वृत्तित्वमप्यस्ति प्राणादेरिति गम्यते ।
परेन्द्रियैः सुखादिस्तु नान्तरत्वात्प्रतीयते ॥ ९८ ॥

*Ślokavārttika, Ātmavāda* 92–98

(*b*) Outline briefly the arguments in the above passage. (5 marks)

2 Translate into ENGLISH: (25 marks)

भेदानां परिणामात् समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥ १५ ॥
कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च ।
परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् ॥ १६ ॥
सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषो ऽस्ति भोक्तृभावात् कैवल्यार्थप्रवृत्तेश्च ॥ १७ ॥
जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥ १८ ॥
तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥ १९ ॥
तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे ऽपि तथा कर्तेव भवत्युदासीनः ॥ २० ॥
पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ २१ ॥

*Sāṃkhyakārikā* 15–21

3 **Translate into ENGLISH:** (25 marks)

तत्र स्वात्मदेवताया एव सर्वत्र कारणत्वं सुखोपायप्राप्यत्वं महाफलत्वं चाभिव्यङ्क्तुमाह —

चितिः स्वतन्त्रा विश्वसिद्धिहेतुः ॥ १ ॥

विश्वस्य सदाशिवादेः भूम्यन्तस्य सिद्धौ निष्पत्तौ प्रकाशने स्थित्यात्मनि परप्रमातृविश्रान्त्यात्मनि च संहारे पराशक्तिरूपा चितिरेव भगवती स्वतन्त्रानुत्तरविमर्शमयी शिवभट्टारकाभिन्ना हेतुः कारणम् । अस्यां हि प्रसरन्त्यां जगदुन्मिषति व्यवतिष्ठते च निवृत्तप्रसरायां च निमिषतीति स्वानुभव एवात्र साक्षी । अन्यस्य तु मायाप्रकृत्यादेः चित्प्रकाशभिन्नस्याप्रकाशमानत्वेनासत्त्वात् न क्वचिदपि हेतुत्वं प्रकाशमानत्वे तु प्रकाशैकात्म्यात् प्रकाशरूपा चितिरेव हेतुः न त्वसौ कश्चित् । अत एव देशकालाकारा एतत्सृष्टा एतदनुप्राणिताश्च नैतत्स्वरूपं भेत्तुमलमिति व्यापकनित्योदितपरिपूर्णरूपेयमित्यर्थलभ्यमेवैतत् । ननु जगदपि चितो भिन्नं नैव किञ्चिदभेदे च कथं हेतुहेतुमद्भाव उच्यते चिदेव भगवती स्वच्छस्वतन्त्ररूपा तत्तदनन्तजगदात्मना स्फुरतीत्येतावत्परमार्थो ऽयं कार्यकारणभावः । यतश्चेयमेव प्रमातृप्रमाणप्रमेयमयस्य विश्वस्य सिद्धौ प्रकाशने हेतुः ततो ऽस्याः स्वतन्त्रापरिच्छिन्नस्वप्रकाशरूपायाः सिद्धावभिनवार्थप्रकाशनरूपं न प्रमाणवराकमुपयुक्तमुपपन्नं वा । तदुक्तं त्रिकसारे —

स्वपदा स्वशिरश्छायां यद्वल्लङ्घितुमीहते ।
पादोद्देशे शिरो न स्यात्तथेयं बैन्दवी कला ॥

*Pratyabhijñāhṛdayam, sūtra* 1

4 **Translate into ENGLISH:** (25 marks)

यो ऽप्याह भावस्य भवित्रापेक्षत्वादात्मास्ति सर्वो हि भावो भवितारमपेक्षते । यथा देवदत्तो गच्छतीत्यत्र गतिभावो गन्तारं देवदत्तमपेक्षते तथा विज्ञानं भावः। तस्माद्यो विजानाति तेन भवितव्यमिति स वक्तव्यः को ऽयं देवदत्त इति । यद्यात्मा स एव साध्यः। अथ व्यवहारपुरुषः सो ऽपि न कश्चिदेकः। संस्कारा हि त एवंनामानः। तत्र यथा देवदत्तो गच्छति तथा विजानाति। कथं च देवदत्तो गच्छति। क्षणिका हि संस्कारा अभिन्नसन्ताना देवदत्त इति बालैरेकसत्त्वपिण्डग्राहेणाधिमुक्ताः स्वस्य सन्तानस्य देशान्तरे कारणं भवन्त उच्यन्ते गच्छति देवदत्त इति। सा च देशान्तरोत्पत्तिर्गतिरिति। ज्वालाशब्दसन्तानयोर्गच्छतिगमनाभिधानवत्। त एव च पुनर्विज्ञानस्य कारणं भवन्त उच्यन्ते विजानाति देवदत्त इति। आर्यैरपि तेषां संज्ञया तथोच्यन्ते व्यवहारार्थम् ।

यत्तर्हि विज्ञानं विजानाति सूत्र उक्तं किं तत्र विज्ञानं करोति । न किं चित् करोति । यथा तु कार्यं कारणमनुविधीयत इत्युच्यते सादृश्येनात्मलाभादकुर्वदपि किं चित् । एवं विज्ञानमपि विजानातीत्युच्यते सादृश्येनात्मलाभादकुर्वदपि किं चित् । किं पुनरस्य सादृश्यम् । तदाकारता । अत एव तदिन्द्रियादप्युत्पन्नं विषयं विजानातीत्युच्यते नेन्द्रियम् ।

*Abhidharmakośabhāṣya* (ed. Dwarikadas Shastri, pp. 1218,4–1219,9)

**END OF PAPER**